दिनाङ्क :- 28.04.2025

प्रात: - 06:55

पीएम- सिक्किम

प्रधानमन्त्री नरेन्द्रमोदी अद्य गङ्गटोक नगरे 'पालजोर' क्रीडाङ्गणे सिक्किम राज्यत्वोत्सवस्य स्वर्णजयन्त्या: समापन-समारोहे भागं ग्रहीष्यति। अस्मिन् कार्यक्रमे सिक्किम-राज्यस्य राज्यपाल: ओमप्रकाशमाथुर:, मुख्यमन्त्री प्रेमसिंहतमाङ्ग-'गोले', सिक्किम-प्रशासनस्य मन्त्रिण: सहैव बहव: सासद: उपस्थिता: भविष्यन्ति। श्रीमोदी अशेषे राज्ये चतुः सहस्र कोटि-रूप्यकाणां विभिन्नानां विकासपरियोजनानां उद्घाटनं, शुभारम्भं शिलान्यासञ्च करिष्यति। अस्मिन् अवसरे प्रधानमन्त्री जनसमूहं च सम्बोधयिष्यति ।

पीएम वाराणसी

सिक्किमस्य यात्रायाः पश्चात् प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रभृति उत्तर प्रदेशस्य द्विदिवसीय-प्रवासे भविष्यति। यात्राया: प्रथमे चरणे सायंकाले प्रधानमन्त्री 'महिला-सम्मेलने' भागं ग्रहीष्यति। स: तत्र प्रायश: षट्सहस्र कोटि-रूप्यकाणां विभिन्नानां विकासपरियोजनानां लोकार्पणं शिलान्यासञ्च विधास्यति। श्रीमोदी प्रत्यग्रं 'अमृत-भारत-एक्स्प्रेस्' रेलयानं प्रति हरितध्वजं प्रदर्शयिष्यति। स: वाराणसी-पण्डित दीनदयाल उपाध्याय जंक्शन इत्यनयो: मध्ये तृतीय-चतुर्थ-रेलमार्ग-परियोजनाया: शिलान्यासम् अपि करिष्यति, यत्र गङ्गा-नद्यां रेल-सेतो: निर्माणमपि सम्मिलितम् अस्ति। श्व: श्रीमोदी वाराणस्यां श्रीकाशीविश्वनाथमन्दिरे दर्शनं पूजनञ्च करिष्यति।

अन्नालीना- संयुक्तराष्ट्र

संयुक्तराष्ट्र-महासभायाः अशीतितम-सत्रस्य अध्यक्षा अन्नालीना बेयरबोक अद्य नवदेहल्यां विदेशमन्त्रीणा डॉ. एस्. जयशङ्करेण सह मिल्यात्। तौ परस्परं हितसम्बद्धेषु प्रमुख-बहुपक्षीय-विषयेषु चर्चां कुर्याताम् ।
सुश्री बेयरबोक महात्मगांधिनं श्रद्धाञ्जलिं अर्पयितुं राजघाट-स्थलं प्रति इयात्। सा इलेक्ट्रॉनिक्स-तथा-सूचना-प्रौद्योगिकी-मन्त्रालयस्य प्रतिनिधिभिः सह 'कृत्रिम-प्रज्ञायाः' शासनं नियमनञ्च इति विषये संवादात्मक-सत्रे भागं गृह्णीयात्। सा ह्यः सायंकाले भारतस्य द्विदिवसीय-प्रवासाय नवदेहलीं प्राप्तवती।

मध्य प्रदेश- यूसीसी

मध्यप्रदेश-प्रशासनेन राज्ये UCC इति 'समान-नागरिक-संहितायाः' प्रवर्तनस्य सम्भाव्यतां परीक्षितुम् एका उच्चस्तरीया समितिः निर्मिता। अस्मिन् विषये ह्यः आदेशः निर्गतः यत् उच्चतम-न्यायालयस्य भूतपूर्वा न्यायाधीशा रञ्जना-प्रसाद-देसाई समितेः अध्यक्षा भविष्यति। अन्येषु सदस्येषु सेवानिवृत्तः भारतीय-प्रशासनिक-सेवा अधिकारी शत्रुघ्न-सिंहः, अनूप-नायरः, शिक्षाविद् गोपाल-शर्मा सहैव समाजसेवकः बुद्धपाल-सिंहः सम्मिलिताः सन्ति। सामान्य-प्रशासन-विभागस्य अपर-सचिवः अजय-कटेसरिया अस्याः समितेः सचिवत्वेन नियुक्तः अस्ति।

ऋतु-विज्ञान

भारत-ऋतु-विभागेन (आई. एम्. डी.) इत्यनेन हरियाणा, चण्डीगढ, मध्यप्रदेश, पञ्जाब्, राजस्थान, उत्तरप्रदेश, बिहार, छत्तीसगढ, गुजरात, विदर्भ-प्रदेशेषु उष्णतरङ्गस्य पूर्वानुमानं प्रकटितम्। अद्य राष्ट्रिय-राजधान्यां पृथक् पृथक् स्थानेषु अपि एतादृशेः स्थितेः अपेक्षास्ति। अद्य दिल्ली-हरियाणा-चण्डीगढ-छत्तीसगढ-पश्चिम-मध्यप्रदेशेषु अपि रात्रौ उष्ण-स्थितिः भविष्यति इति विभागेन पूर्वानुमानितम्।

## आई. पी. एल्.- क्रिकेट्

आई. पी. एल्. क्रिकेट्-क्रीडायां रायल्-चैलेंजरस-बेङ्गळूरु दलेन दिल्ली कैपिट्ल्स दलं नव स्तोभै: पराजितम्। अद्य पंजाब किंग्स दलं राजस्थान  रायल दलेन सह स्पर्धिषीष्ट। क्रीडा च सायं सार्द्ध सप्तवादने भविष्यति ।